# प्रवरादिमन्त्र व्याख्यान विवरणम्

**DSV Jagannatha Sharma**
**Assistant Professor**
**Kalpa Department, S.V. Vedic University,Tirupati**

**अग्ने॑ म॒हाँ अ॒सीत्या॑ह म॒हान् ह्ये॑ष यद॒ग्निर्ब्रा॑ह्म॒णेत्या॑ह ब्राह्म॒णो ह्ये॑ष भरतेत्योहैष हि**
**दे॒वेभ्यो॑ ह॒व्यं भर॑ति दे॒वेद्ध॒ इत्या॑ह दे॒वा ह्ये॑त॒मैन्ध॑त॒**

'अग्ने महाँ असि' इत्यादिना प्रवरमन्त्रपदानि व्याचष्टे॥ महान् ह्येष इति। स्वभावत एवेति भावः। ब्राह्मणो ह्येष इति। यत् "अग्निः एव जात्या [1]ब्राह्मणः, ब्रह्मणो मुखात् द्वयोरपि जातत्वात्। ब्रह्मणोपत्यत्वेन वा स्तुतिः। "ब्राह्मोजातौ" (पा ६.४.१७१) इति व्यत्ययेन प्रवर्तते। एष-हीति। [2]हविषां भरणात् भारतः, भरतानामृत्विजामपत्यत्वात् भारतः॥

अथ प्रवरमुक्त्वा निविदोन्वाह -'देवेद्धः' इत्याद्याः॥ ता व्याचष्टे -'देवा हि'इति। "देवाः ऋत्विज इन्द्रादयो वा [3]एतम् ऐन्धत दीपयन्ति, तस्मात्'देवेद्धः। " तृतीया कर्मणि "

**द्वितीयाद्याःसामिधेन्यो व्याख्याता अष्टमे स्फुटम्॥**

अथ नवमे [4]प्रवरमन्त्रस्य निगदस्य स्रुगादापननिगदस्य च व्याख्यानं प्रवर्तते।ते च [5]निगदादयो मन्त्रकाण्डे (तैब्रा ३·५·३-४) समाम्नाताः। **कल्पः-** "अथ निवित्पदान्यन्वाह देवेद्धो मन्विद्ध इति सप्तमे स्वनिति अथ चतसृषु " (द्र. आप श्रौ २४-११-१७-२४.१२.१*) इति॥ पाठस्तु - "अग्ने महाँ असि ब्राह्मण भारत। असावसौ। देवेद्धो मन्विद्धः। ऋषिष्टुतो विप्रानुमदितः। कविशस्तो ब्रह्मसँशितो घृताहवनः। प्रणीर्यज्ञानाम्। रथीरध्वराणाम्। अतूर्तो होता। तूर्णिर्हव्यवाट्। आस्पात्रं जुहूर्देवानाम्। चमसो देवपानः। अराँ इवाग्ने नेमिर्देवाँस्त्वं परिभूरसि। आवह देवान् यजमानाय" ( तैब्रा ३.०.५.०.३ )॥ अत्र'अग्ने महान्' इत्यारभ्य'असावसौ' इत्यन्तः प्रवरमन्त्रः। अवशिष्टा निविन्मन्त्राः। तेषामर्थं [6]ब्राह्मणव्याख्यानमुखेनैव स्पष्टीकरिष्यामः॥

**अग्न इति॥** [7]तत्र प्रवरमन्त्रार्थं दर्शयति-'अग्ने महाँ असीत्याह महान् ह्येष यदग्निर्ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो हव्यं भरति' इति॥ अग्निः इति यत् एषः यस्मात् सर्वाहुत्याधारत्वेन "महान् तस्मान्मन्त्रे महान् असि इति उच्यते। यस्माद्ब्राह्मणवर्णाभिमानी तस्मात् ब्राह्मणः " इति संबोध्यते। यस्मात् एषः'देवेभ्यः'हव्यं भरति धारयति तस्मात् भारत इति संबोध्यते। मन्त्रे येयम्'असावसौ' इति वीप्सा तेन (तया) भृग्वादीनामृषीणां नामनिर्देशोभिप्रेतः। स च'भार्गव च्यावन' इत्यादिना पूर्वानुवाक एवास्माभिरुदाहृतः॥

**देवेद्ध इति॥** निवित्पदेषु सप्तसु [8]प्रथमपदस्यार्थं दर्शयति-'देवेद्ध इत्याह देवा ह्येतमैन्द्धत इति॥ यस्मात् देवाः स्वकीयेषु यागेषु एतम् अग्निम् ऐन्द्रत प्रज्वालितवन्तस्तस्मात् देवेद्धः इति उच्यते॥

**मन्वि॑द्ध॒ इत्या॑ह॒ मनुर्हो॑तमुत्त॑रो दे॒वेभ्य॒ ऐन्द्धर्षि॑ष्टुत॒ इत्या॒हर्षी॑यो॒ ह्ये॑तमस्तु॑व॒न् विप्रा॑नु॒मदत॒ इत्या॑ह॒ ( १ ) विप्रा॒ ह्ये॒ते यच्छु॑श्रु॒वासः कविश॒स्त इत्या॑ह क॒वयो॒ ह्ये॑ते यच्छु॑श्रु॒वाँसो॒ ब्रह्म॑सँशित॒ इत्या॑ह॒ ब्रह्म॑सँशितो॒ ह्ये॑ष घृ॒ताह॑व॒न इत्या॑ह**
**घृताहुतिह्येस्य प्रियर्तमा**

( पा ६.२.४८ ) इति पूर्वपदप्रकृतिस्वरत्वम्। मनुर्ह्येतमिति। मनुः हि एतम् [9]देवतार्थम् ऐन्द्ध देवेभ्यः। अपि वा मनुः [10]उत्तरः एतस्मात् मन्विद्धः। पूर्ववत् स्वरः। एवं सर्वत्र। ऋषयः [11]"दर्शनवन्तोपि एनम्" अस्तुवन्। विप्रा हीति। विप्राः मेधाविनः ये शुश्रुवासः श्रुतार्थाः [12]गृहीतवेदार्थाः तैरप्यनुमदितः अनुमोदित अनुक्रमेण वा स्तुतः। मद तृप्तियोगे, मन्दतेर्वा छान्दसो नुमभावः।

**कवयो हीति॥** कवयः क्रान्तदर्शनाः सूक्ष्मदृशः तेपि श्रुतवन्तः एव। तैरपि शस्तः स्तुतः। ब्रह्मसँशितो हीति॥ ब्रह्मणा ऋगादिना मन्त्रेण परवस्तुनैव वा संशितः सम्यक् तीक्ष्णीकृतः। घृताहुतिहीति। [13]घृतमाहवनमाहुतिः [14]प्रीतिहेतुरस्येति घृताहवनः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्।

[1] तं३ ए लं .ब्राह्मणःष इत्यस्यानन्तरम्ष्अग्निःष

[2] हो . हविषः।

[3] तं३ए लंए हो . एनम्।

[4] डए शृंए हो १ . निवित्पदानाम् आवाहनश्।

[5] डए शृंए हो १ . निविदादयः। ' ख अत्र कौषी. तकिब्राह्मणम् ; ३ए३ए१४ . १७ द्ध अपि द्रष्टव्यम्। ,।

[6] ड . ब्राह्मणमुखेनैव।

[7] क . अत्र।

8 आ. प्रथमस्यार्थं ।

[9] तं३ए लंए हो . देवार्थम्।

[10] मै. उत्तरो मनुः।

[11] मै. हि एनम्।

[12] हो.गृहीतपदार्थाः।

[13] ए तं३ ए लं . घृताहवनश्

[14] हो . प्रीतिर्हेतु।

**मन्विद्ध इति॥** [1]द्वितीयपदस्यार्थं दर्शयति-'मन्विद्ध इत्याह मनुर्खेतमुत्तरो देवेभ्य ऐन्द्व इति॥'देवेभ्यः'उत्तरः देवैरिन्धनादूर्ध्वं स्वकीययागे मनुः ऐन्द्व॥

**ऋषिष्टुत इति॥** उत्तरेष्वपि [2]"पञ्चसु पदेषु" प्रसिद्धार्थतां हिशब्दो द्योतयति -'ऋषिष्टुत इत्याहर्षयो ह्येतमस्तुवन् विप्रानुमदित इत्याह विप्रा ह्येते यच्छुश्रुवाँसः कविशस्त इत्याह कवयो ह्येते यच्छुश्रुवाँसो ब्रह्मसँशित इत्याह ब्रह्मसँशितो ह्येष धृताहवन इत्याह घृताहुतिर्ह्यस्य प्रियतमा'इति॥'शुश्रुवाँसः श्रुताध्ययनसंपन्ना जात्या विप्राः विद्यया [3]विबुधाः कवयः च भवन्ति तैरयमनुमदितस्तोषितःशस्तः स्तुतश्च। ब्रह्मणा मन्त्रेण संशितस्तीक्ष्णीकृतः। घृत रूपमाहवनम् [4]आहुतिः यस्यासौ घृताहवनः॥

**प्रणीर्यज्ञानामित्याह प्रणीर्ह्येष यज्ञानाँ रथीरध्वराणामित्याहैष हि देवरथोतूर्तो होतेत्याह न तं कश्चन ( २ ) तरति तूर्णिर्हव्यवाडित्याह सर्वँ ह्येष तरत्यास्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां**

प्रणीरिति। प्रकर्षेण यज्ञानां नेता उत्पादयिता॥

**देवरथ इति॥** अध्वराणां देवान् प्रति रंहयिता देवरथः। रंहणात् रथीः। औणादिक इप्रत्ययो वर्णविकारः। न हीति। कश्चिदप्येनं न तरति नातिक्रमते। तरतेः कर्मणि निष्ठायां [5]छान्दसो नत्वाभावः। नञ्समासे "परादिश्छन्दसि°" (पा ६.२.१९९) इत्युत्तरपदाद्युदात्तत्वम्। केनचिदप्यतिक्रमितुं न शक्तः। होता देवानामाहाता। सर्वं हीति। तरतेः कर्तरि औणादिको नित्प्रत्ययः (द्र उ५००), क्तिन्येव वा "ऋकारत्वादिभ्यः क्तिनिष्ठावद्भवति" (पा ८- २०४४ वा १) इति निष्ठावद्भावः,"रदाभ्याम्°" इति णत्वम्। सर्वं तरितुमतिक्रमितुं समर्थः, हविषां वोढारम्। जुहूर्हीति। जुहूस्थानीयोयं देवानां यथा जुह्वाग्नौ हविः प्राप्यते एवमग्निना देवेषु हविः प्राप्स्यते इति। [6]विशेषस्त्वस्य आस्पात्रत्वम्। अयस्पात्रवत् दृढतरा अग्निलक्षणा जुहूरिति॥

**प्रणीरिति॥** अनुच्छ्वासेन पठनीयानां सप्तपदानामर्थं दर्शयित्वोच्छ्वासादूर्ध्वं पठनीयानां चतसृणां निविदामर्थं दर्शयति-'प्रणीर्यज्ञानामित्याह प्रणीर्ह्येषं यज्ञानाँ रथीरध्वराणामित्याहैष हि देवरथोतुर्थौ होतेत्याह न ह्येतं कश्चन तरति तूर्णिर्हव्यवाडित्याह सर्वँ ह्येष तरति' इति॥ यज्ञानां [7]प्रणेतृत्वमग्नौ प्रसिद्धम्। रथीः देवानां हविर्वहनाय अध्वराणां [8]संबन्धी रथोयमग्निः। यस्मादाहातारम् एतम् अनि कोपि देवो न तरति नातिक्रामति तस्मादयम् अतूर्तः होता इति उच्यते। यस्मात् सर्वम् अपि देवमयं [9]हविर्वहनात् तरति प्राप्नोति तस्मात् तूर्णिः हव्यवाट् इति उच्यते॥

**आस्पात्रमिति।** एताभ्यश्चतसृभ्यो [10]निविद्भ्य ऊर्ध्वमुच्छ्वासं कृत्वा पश्चात् पठनीयानां चतसृणां निविदामर्थं दर्शयति-'आस्पात्रं जुहूर्देवानामित्याह जुहूर्ह्येष देवानां चमसो देवपान इत्याह

**चमसो देवपान इत्याह चमसो ह्येष देवपानोराँ ईवाग्ने नेमिर्देवाँस्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै ( ३ ) जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयत्यग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत**

**चमसो हीति॥** देवा येन सोमं पिबन्ति सः देवपानः चमसः। तत्स्थानीयोयमग्निः। देवान् हीति। एषः हि देवान् परितः सर्वतो भवति परिगृह्णाति व्याप्नोति अरान् इव "नेमिः तस्मात् देवान् परिभूः असि इति उच्यते। "अभितः परितः°" (द्र पाभा २.३.२ वा १) इति द्वितीया, छान्दसस्तसि लोपः॥

[11]**यद्भूयादिति॥** "आवह देवान् यजमानाय"( तैब्रा ३.५.३ ) इत्यन्ता निवित्। शाखान्तरेषु तु'आवह देवान् देवयते यजमानाय'इति पाठः। सोनेन निन्द्यते। यदि ब्रूयात् "देवयते यजमानाय इति भ्रातृव्यम् अस्मै यजमानाय जनयेत्। तथा हि- यजमानाय देवान् आवह इति एव यावद्देवानामुपादाने सिद्धे पुनः देवानात्मन इच्छते यजमानायेति विशेषणोपादानं देवव्यतिरिक्तानामनिष्यमाणतया यजमानस्य [12]भ्रातृव्यवत्त्वं [13]सूचयेत्। ततश्च भ्रातृव्यवान् [14]यजमानः स्यात्। तस्मात्'देवयते' इति पदं नोपादेयम्। ततश्च भ्रातृव्यशङ्काया अभावात् यजमानं वर्धयति एव ऐश्वर्येण॥

चमसो ह्येष देवपानोराँ इवाग्ने नेमिर्देवाँस्त्वं परिभूरसीत्याह देवान् ह्येष परिभूर्यद्ब्रूयादा वह देवान् देवयते यजमानायेति भ्रातृव्यमस्मै जनयेदा वह देवान् यजमानायेत्याह यजमानमेवैतेन वर्धयति' इति॥ एषः अग्निः देवानां जुहूसदृशो जुह्वामिवास्मिन् हविष्प्रक्षेपात्। न चास्य दारुमयजुहूवच्छैथिल्यं किं तु आस्पात्रं लोहपात्रवत् [15]दाढर्यमित्यर्थः। यथा मनुष्याणां सोमपानहेतुः चमसः [16]तथा देवानां पानसाधनचमसस्थानीयोयमग्निः। हे अग्ने, त्वं यथा शकटचक्रस्थितान् कुलालचक्रस्थितान् वा तिर्यक्कीलरूपान् अरान् नेमिः परितो व्याप्नोति तथा देवानां परिभूः परितो व्याप्तवान् असि। चतुर्थ्यां निविदि'देवयते'इति पदं शाखान्तरे पठ्यते। तदत्र यदि ब्रूयात् तदा होता यजमानस्य|

---

[1] अण्इण्उण्जोण्णाण्पाण्हा.ष्यपादस्यार्थं।

[2] क . पञ्चपदेषुय हा . पञ्चसु पादेषु।

[3] डण्शृंण्हो १ .ष विबुधाःष नास्ति।

[4] ड . वीर्यम्।

[5] तं३ ण लंण हो. छान्दसे।

[6] तं३ण लंण हो . विशेषस्य।

[7] आण कण ना . नेतृत्वय अण इण उण डण्जोण पाण्हाण हो १ . होतृत्वश।

[8] अण इण उण जोण पाण हा. संवीत।

[9] डण्शृं . वहनेन।

[10] अण इण उण जोण नाण पाण हा .षनिविदाम्ष नास्ति।

[11] लं. यदि ब्रूया°।

[12] लंण हो . भ्रातृव्यत्वम्।

[13] मै . सूचयति।

[14] मै. यजमानष इत्यस्यानन्तरंष्वश।

[15] आ . दृढमि।

[16] अण इण उण जोण पा . तथा त्वंय हा . तथा तथा त्वं।

अथ निविद उक्त्वा'अग्निमग्न आवह' इत्यादिना देवता आवाहयति-- यथापूर्वमिति॥ अग्न्याद्या यागदेवता अनुक्रमेणाग्निनावाहयति॥

भ्रातृव्यं जनयेत्। देवानिच्छतीति देवयंस्तस्मै देवयते यजमानाय। एतत्पदप्रयोगेणान्यः कश्चिदेतदीयान् देवानिच्छतीति [1]प्रतिभाति। तदेतद्भ्रातृव्यस्योत्पादनम्। तस्मात् तत्पदं परित्यज्यास्मै यजमानाय देवान् आ वह इति एतावदेव वाक्यशेषात् तेन [2]"एव एतेन" यजमानं वर्धयति वृद्धिं प्रापयति॥

**अग्निमिति॥ कल्पः-** "देवतां देवतामावाह्य व्यनित्यग्निमग्न आवह सोममावहाग्निमावह प्रजापतिमित्युपाँश्वावहेत्युच्चैर्यद्वेवत्यो वा भवत्यग्नीषोमावावहेन्द्राग्नी आवहेन्द्रमावह महेन्द्रमावह देवाँ आज्यपाँ आवहाग्निं होत्राया वह स्वं महिमानमावहेति न स्वं [3]"महिमानमावहेदा चाग्ने" देवान् वह सुयजा च यज जातवेद इत्युक्त्वा" (द्र. आश्वश्र १.३.७ - २२) इति॥ अत्रावाहननिगदो मन्त्रकाण्डे ( तैब्रा ३०५. ३ ) समाम्नातः सर्वोपि सूत्रकारेण पठितः॥

*-[तस्य सर्वस्य तात्पर्यं दर्शयति-'अग्निमग्न आवह सोममावहेत्याह देवता एव तद्यथापूर्वमुपह्वयते' इति॥ तत् तेनावाहननिगद आवहेति पाठेनाज्यभागादिसर्वयागदेवता अनुक्रमेण [4]"एव आह्वयति"। ] -*।

हे आहुत्याधारभूताग्ने, प्रथमाज्यभागदेवतामग्निमावह। द्वितीयाज्यभागदेवं सोममाह।पौर्णमास्याममावास्यायां च प्रथमपुरोडाशदेवमग्निमावह। [5]पौर्णमास्यामुपांशुयागदेवं प्रजापतिमावह। प्रजापतिपदं शनैरुच्चार्यावहेतिपदमुच्चैः [6]उच्चारयेत्। पौर्णमास्यां [7]द्वितीयपुरोडाशदेवरूपावग्नीषोमावावह। अमावास्यायामसांनायिनो द्वितीयपुरोडाशदेवत्वेनेन्द्राग्नी आवह | अगतश्रियः सांनाय्यदेवमिन्द्रमावह | गतश्रियो महेन्द्रमावह। आज्यपान् प्रयाजानूयाजदेचानावह। [8]"अग्निं होत्राय होमस्य" [9]स्विष्टकृत्वकरणाय | आवाहनविषयाणामुक्तानां देवानां यो यस्य देवस्य स्वकीयो महिमा सामर्थ्यातिशयस्तं महिमानमावह। अत्र हविर्भुज एव देवानभिप्रेत्य स्वं महिमानमित्युच्यते, न त्वावाहन- कर्तुरग्नेर्महिमानं तस्यावाहनविषयत्वाभावात् इति कल्पसूत्रस्यार्थः॥ जातानि वेदांसि ज्ञानानि यस्मादसौ जातवेदाः। सर्वज्ञोयं सर्वदेवमहिमा भिज्ञत्वादित्यर्थः। तादृश हेने, त्वं देवानावह च सुयजा शोभनेन यज्ञेन यज च। न केवलमावाहनं कर्तव्यं, किं तु हविष्प्रापणलक्षणो यागोपि त्वयैव [10]कर्तव्यः। अत्र सूत्रे प्रजापतिमित्युपांश्वावहेत्युच्चैर्यद्वेवत्यो वा भवतीत्युक्तं तच्चोपांशुयाजे प्रजापतिविष्ण्यग्नीषोमाणां विकल्पाभिप्रायेण द्रष्टव्यम्। एतस्यावाहननिगदस्य तात्पर्यं संक्षेपेण दर्शयति-'अग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयते इति॥
तत् तेनावाहननिगदेनाज्यभागादिस्विष्टकृदन्तदेवताः सर्वाः [11]अपि क्रमेणहूतवान् भवति। [12]प्रथममाज्यभागदेवौ तथा प्रधानदेवता इत्यादिक्रमः'यथापूर्वम्' [13]इत्यनेन उच्यते॥

**आ चाग्ने देवान् वह सुयजा च यज जातवेद इत्याहाग्निमेव तत् सँ श्यति सोस्य सँशितो देवेभ्यो हव्यं वहत्यग्निर्होते ( ४ ) त्याहाग्निर्वै देवानाँ होता य एव देवानाँ होता तं वृणीते स्मो वयमित्याहात्मानमेव सत्त्वं गमयति साधु ते यजमान देवतेत्याहाशिषमेवैतामा शास्ते यद्ब्रूयाद्येग्निँ होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात्**

आ चाग्न इति। आ वह देवान् सुयजा त्वम् अभिन्नेन च शोभनेन च यागेन च देवान् यज हे जातवेदः, त्वं खलु जातानां वेदिता जातवेदा जातधनो वा इत्येवम् उपश्लोकनेन अग्निं सँश्यति सम्यक् तीक्ष्णीकरोतीत्येव। सः चाग्निः [14]तथोज्ज्वलीकृत: तुष्टो देवस्थानं प्रापयति॥ [15]स्मः स्याम वयं होतारः सर्वदा तव इति मन्त्रार्थं दर्शयति। आशिषमिति॥ हे यजमान, इज्यमाना देवता तव साधयित्री अभिमतानाम् इत्येताम् आशिषम् अनेन आ।

**एति ||** आवाहननिगदावसगने [16]यदेतन्निगमनवाक्यं तस्य तात्पर्यं दर्शयति-'आ चाग्ने देवान् वह सुयजा च यज जातवेद इत्याहाग्निसेव तत् सँश्यति सोस्य सँशितो देवेभ्यो हव्यं वहति'इति॥ तत् तेन वाक्यपाठेन अग्निम् एव सँश्यति [17]तीक्ष्णीकरोति। सः अग्निस्तीक्ष्णीकृतोप्रमत्तः सन् [18]अस्य यजमानस्य हव्यं देवेभ्यः क्रमेण वहति॥

**कल्पः–**"अथ स्रुगादापनेन स्रुचावादापयत्यग्निर्होता वेत्त्वित्यनुवाकेनाध्वर्युर्जुहूपभृतौ सुचावादत्ते" ( द्र. आश्वश्रौ १.४०९-१० ) इति। "घृतवति शब्दे जुहूपभृतावादाय" ( आपश्री २०१७- १ ) इत्याध्वर्यव - सूत्रे [19]दर्शितवान्। होता तु - " घृतवतीमध्वर्यो स्रुचमास्यस्व " ( तैब्रा ३.५.४ ) इत्यनेन शब्देन युक्तम् अनुवाकं पठति। तदिदं स्रुचोरादापनम्। सोयमनुवाको मन्त्रकाण्डे ( तैब्रा ३०५ ४) समाम्नातः। तस्य पाठस्तु--"अग्निर्होता वेत्त्वग्निः। होत्रं वेत्तु प्रावित्रम्। स्मो वयम्। साधु ते यजमानदेवता। घृतवती - मध्वर्यो स्रुचमास्यस्व। देवायुवं विश्ववाराम्। ईडामहै देवाँ ईडेन्यान्। नमस्याम नमस्यान्। यजाम यज्ञियान् " ( तैब्रा ३०५०४) इति। अयमग्निर्होता होमस्य कर्ता। तथा चान्यत्र मन्त्रब्राह्मणे [20]आम्नायते -"अग्ने यष्टरिदं नम इत्याह। अग्निर्वै देवानां यष्टा" (तैब्रा ३.३०७) इति। अतोयमग्निर्वेत्तु होमक्रमं जानातु। तदेव [21]वेदनमुत्तरवाक्ये स्पष्टीक्रियते। प्रकृष्टमवित्रं फलदानरूपमस्मद्रक्षणं यस्मिन् होमानुष्ठाने तदिदं प्रावित्रम्। तादृशं होत्रं होमानुष्ठानं वेत्तु होमक्रमं जानातु। न केवलं दैव्यस्य होतुरमेरुपरि भारः

---

[1] आण्हा . प्रतिमा भवति।
[2] कण हो १ . एवय हा . एव तेनय शृं. एव एनम् य ड. एनम्।
[3] क . नमावहादावने।
[4]आण क . ह्वयते।
क . सर्वोन्यत्र नात्र। ख्ग्रन्थोऽयमधिक इवाभाति। ,।
[5] हा . यागे देवंय . याजदेवं।।
[6] ड . उच्चरेत्।
[7] आ.देवमग्नीषोमरूपमाह।
[8] ण हा . अग्निहोमस्य।
[9] आण हा . स्विष्टकरणाय।
[10] हो १ . कार्यःय ड. कार्य इत्यर्थः।
[11] आण ड .ष अपिष नास्ति।
[12] आण कण्हाण्हो १ . प्रथमाज्यश।
[13] आ . इत्यादिना।
[14] मै४ . तथा स्थूलीकृतः।
[15] तं३ ण लं.ष स्मःष नास्ति।
[16] अण इण उण्पाण हा . वाच्यं।
[17] डण शृंण हो १ . करोत्येव।
[18] आ . तस्य।
[19] ड. अभि. हितवान्य शृंदृ अभिहितत्वात्।
[20] आ.आम्नातम्।
[21] आ . वाक्येन ;णद्ध।

प्रक्षिप्यते कि तु वयं स्मो मनुष्यहोतारो [1]वयमप्यत्र वर्तामहे। अतो वयमपि [2]होमक्रमज्ञानवन्तः तिष्ठामः। हे यजमान,ते तव हविः स्वीकर्त्री देवता साधु फलं ददात्विति शेषः। हेध्वर्यो, [3]"घृतपूर्णां स्रुचं" जुहूमास्यस्वाक्षिप स्वीकुर्वित्यर्थः। कीदृशीं स्रुचम् ? देवायुवं देवान् यौति मिश्रयतीति देवायुस्तादशीम्। [4]विश्ववारां विश्वान् सर्वान् राक्षसकृतान् विघ्नान् वारयतीति विश्ववारा तादृशीम्। ईडेन्यान् स्तुतिप्रियान् मनुष्यान् [5]वयं स्तुमः। नमस्यान् नमस्कारप्रियान् पितॄन् [6]नमस्करवाम। यज्ञियान् यज्ञप्रियान् देवान् यजाम॥

**अग्निरिति॥** अग्नेर्होतृत्वं वेदेषु प्रसिद्धमित्येतत् दर्शयति-'अग्निर्होतेत्याहाग्निर्वै देवानाँ होता य एव देवानाँ होता तं वृणीते' इति॥

**स्म इति॥** दैव्यस्य होतुः साहाय्यमाचरितुं मानुषस्य स्वस्य [7]सद्भाव इत्येतत् दर्शयति-'स्मो वयमित्याहात्मानमेव सत्त्वं गमयति'इति॥

**साध्विति॥** ददात्वित्येतादृशेनाशीरर्थेन [8]"वाक्यपूरणम् इत्यभिप्रायं" दर्शयति-'साधु ते यजमान देवतेत्याहाशिषमेवैतामा शास्ते' इति॥ शाखान्तरे' साधु ते यजमान देवता' इत्यस्योपरि योग्निं होतारमवृथाः'(द्र. आश्वश्रौ १.४.१० ) इति किंचिद्वाक्यमाम्नातम्। तस्यायमर्थः- हे यजमान, [9]"यस्त्वमग्निं होतारमवृथा" होतृत्वेन वृतवानसि तस्य तव साधु ददात्विति॥

**यदिति॥** तमिमं शाखान्तरपाठं दूषयति-'यद्ब्रूयाद्योग्निँ होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात् प्रमायुकः स्यात्' इति॥'अग्निर्होता वेत्त्वग्निः' इत्युपक्रमे पठितम्, 'साधु ते यजमान देवता' इत्यस्मादप्यूर्ध्वं यदि' अग्निँ होतारम्' इति ब्रूयात् तदोभयोः पार्श्वयोर्यजमानः "अग्निना परिगृहीतो भवेत्। ततो दाहाधिक्येन म्रियेत। तस्माच्छाखान्तरपाठो नादर्तव्यः॥

**प्रमायुंकः स्याद्यजमानदेवुत्यां वै जुहूर्भ्रातृव्यदेवुत्योंपुभृत् ( ५ ) यद्द्वे ईव ब्रूयाद्- भ्रातृंव्यमस्मैं जनयेद्धृतवंतमध्वयो स्रुचुमास्युस्वेत्यांह यजंमानुमेवैतेनं वर्धयति**

शास्ते। भवत्येव च तत्फलमिति। अत्र 'साधु ते यजमान देवता योग्निं होतारमवृथाः' ( द्र. आवश्रौ १०४.१० ) इत्यध्वर्यु प्रवरानुवादेन शाखान्तरीयपाठः। सोनेन निन्द्यते। एवं हि ब्रुवन् अग्निना यजमानम् उभयतः परि गृह्णीयात्, 'अग्निर्होता वेत्वग्निः', 'अग्निं होतारमवृथाः'( द्र. आवश्र १४.१०) इत्येतयोर्मध्ये यजमानस्य श्रवणात्; ततोयं प्रमायुकः मरणशीलः "स्यात्। तस्मात् तथा न कर्तव्यमिति। मीयतेश्छान्दस उकञ्।।

यजमानदेवत्येत्यादि || अत्र "घृतवतीमध्वर्यो स्रुचम्" ( तैब्रा ३.५.४ ) इत्येकवचनेन स्रुक् निर्दिश्यते।'द्वे' इति जुहूपभृतौ आदीयेते। तस्मात् द्वित्वादानस्याभिप्रायं ब्राह्मणमिदमिति दर्शयति - यत् द्वे इव ब्रूयात् [10]सामान्यविवक्षां कृत्वा घृतवत्यौ स्रुचाविति यदि द्वे एव जुहूपभृतौ पृथनिर्दिशेत् तदा भ्रातृव्यदेवत्याया उपभूतोप्युद्भ्दरूपत्वाद्यजमानाय भ्रातृव्यं जनयेत्। एकवचनेन निर्देशात् यजमानदेवत्या वै जुहः एव [11]उद्भूतरूपा भवतीति भ्रातृव्याभावादैश्वर्येणैनं वर्धयति इति। नन्वेकवचनेन सामान्यात् द्वयोरपि निर्देशात् पुनरप्युद्भूतैवोपभृत्।

**यजमानदेवत्या इति॥** यद्यपि जुहूपभृतौ द्वे अपि आदातव्ये तथापि तयोः समं प्राधान्यं निवार्य जुह्वा एव प्राधान्यं [12]द्योतयितुं स्रुचम् इत्येकवचनमेव [13]पठनीयमित्येतद्दर्शयति-'यजमानदेवत्या वै जुहूर्भ्रातृव्यदेवत्योपभृद्यद्द्वे इव ब्रूयाद्भ्रातृव्यमस्मै जनयेद्धृतवतीमध्वर्यो स्रुचमास्यस्वेत्याह यजमानमेवैतेन वर्धयति' इति॥ स्रुचावित्येवं द्विवचनेन द्वे' इव द्वे अपि समप्रधाने इव यदि ब्रूयात् तदा यजमान समानं भ्रातृव्यम् उत्पादयेत्। तस्मादुपभृतमुपेक्षितामिव तिरस्कर्तुं जुहूप्राधान्यायैकवचनाभिधानेन यजमानं वर्धितवान् भवति। न हि जुह्वा इवोपभृतः क्वचिदपि साक्षाद्धोमसाधनत्वमस्ति। तस्मादुपसर्जनत्वं तस्या युक्तम्॥

**देवायुवमित्यांह देवान् ह्येषावंति विश्ववांरामित्यांह विश्वँ ह्येषावतीयंमहै देवाँ ईडेन्यांन् नमस्यामं नमस्यांन्**

स्यात्। यद्यपि गुणभूतत्वादुपभृतः [14]स्वातन्त्र्येण ग्रहणं नास्ति तथापि तुल्यप्रतिपत्ती स्याताम्। नैष दोषः। द्वे इति द्विवचनान्तस्यैव प्रतिषेधो विवक्षितः। [15]"इवशब्देन हि शब्दप्रतिपन्नयोः" द्वयोः समत्वं प्रतिद्योत्यते। तस्माद्धोमसाधनभूता जुहूरेव [16]उपभृता गृह्यते॥

देवान् ह्येषेति || देवानात्मन इच्छति रक्षितुमेवेति भावः। विश्वं हीति। विश्वकालप्रतिपत्तित्वात् विश्वम् इयं रक्षति। मनुष्या वा इत्यादि। मनुष्यादयोपि देवताः। तत्र मनुष्यात्मिकाः ईडेन्याः स्तुत्याः। औणादिक एन्यप्रत्ययः। पित्रात्मिका नमस्याः। नमो- वरिवश्चित्रङः क्यच्" ( पा ३.१.१९ ), तदन्तादचो यत्। [17]देवतात्मिका यज्ञिया यर्शाहा

**देवायुवमिति॥** [18]देवमिश्रणेन देवरक्षणं [19]विघ्ननिवारणेन विश्वरक्षणमभिप्रेतमित्येतद्दर्शयति-'देवायुवमित्याह देवान् ह्येषावति विश्ववारामित्याह विश्वँ ह्येषावति' इति॥

---

[1] ड. वयं च।
[2] होमक्रमं जानन्तः।
[3] ड . घृतसंपूर्णा।
[4] ण हा .षविश्ववारां नास्ति।
[5] अण इण उण जोण नाण पाण डा.श्वयंश नास्ति।
[6] ण आ . नमस्कुर्मः।
[7] श्रृं. सद्भावकथनम्।
[8] आ. वाक्यपूरणाय तात्पर्यार्थ डए हो१ . वाक्यपूरणाय।
[9] ड . यस्त्वग्निं।।
[10] तं३ ण लंण हो .षविवक्षिताम्।
[11] त्रिण लंण हो . उद्भूता।
[12] ण शृं. दर्शयितुं।
[13] हो१ . वदनीयमि।
[14] तं३.स्वतन्त्रंय लंणहो१ . स्वातन्त्र्यश।
[15] त्रि . इवशब्दे तत्तच्छाब्द्यं प्रति य पं२ण्लंण हो . इवशब्दे तभ ; १ द्ध शाब्धं प्रति य तं३ . इवशब्देन हि शाब्धं प्रति।
[16] मै४.उद्भूता।
[17] तं३ण्लंण हो . देवात्मिका।
[18] कहा. देवमिश्रेण।
[19] शृं.विश्वविघ्न ं।

**ईडामहा इति॥** ईडेन्यादिशब्दैः विवक्षितम् [1]अर्थ दर्शयति - " ईडामहै देवाँ ईडेन्यान् नमस्याम नमस्यान् यजाम यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव तद्यथाभागं यजति 'इति। 'देवताः यजति' इत्येतदुपलक्षणम्। मनुष्यान् स्तौति पितृन्नमस्यतीत्येतदपि द्रष्टव्यम्। एवं च सति यस्य मनुष्यादेर्यो भागः स्तुत्यादिरूप उपचरितस्तं भागमनतिक्रम्यानुष्ठितवान् भवति॥

**यजांम यज्ञियानित्यांह मनुष्यां वा ईडेन्यां पितरों नमस्यां देवा यज्ञियां देवतां एव ( ६ ) तद्यंथाभागं यजति॥ ९॥**

[ विप्रांनुमदिंत इत्यांह चनास्मै होतांपभृद्देवतां एव त्रीणि च। ]

यष्टव्याः। " यज्ञर्लिंग्भ्यां घखञौ " (पा ५-१-७१ ) यथाभागमिति। या देवता यस्यां प्रतिपतौ तत्तदनतिक्रमेण तां यजति [2]पूजयति॥

**इति द्वितीये पञ्चमे नवमोनुवाकः॥**

[3]अत्र मीमांसा॥ दशमाध्यायस्य चतुर्थपादे चिन्तितम् -
चातुर्मास्यातिदिष्टेषु निगमेष्वाज्यपानिति।
विक्रियेत न वाद्येपि किं स्याद्दध्याज्यपानिति॥
दधिपानिति वा यद्वेत्येवं स्यात् पृषदाज्यपान्।
द्रव्यद्वयोक्तेराद्यः स्यादधिमात्र हविष्ट्वतः॥
द्वितीयः स्यात् तृतीयोस्तु द्रव्यान्तरविधानतः।
गुणो दध्ना चित्रताज्ये ततो विक्रियते नहि "॥ ( जैन्या १०.४.४०-४२ )॥

चातुर्मास्येषु चोदकेनावाहनस्वाहाकारायाड्जोषणनिगमा अतिदिष्टाः। तत्राज्यपशब्दःप्रयुक्तः "देवाँ आज्यपाँ आवह" (तैब्रा ३.५.२ ), " स्वाहा देवाँ आज्यपान् ", " अयाइदेवाना- माज्यपानां प्रिया धामानि " ( तैब्रा ३.५.७), " देवा आज्यपा आज्यमजुषन्त" ( तैब्रा ३.५.१८) इति॥ सोयमाज्यपशब्दो विक्रियते न वेति संशयः। [4]तत्र विकारः [5]अपि त्रिविधः। तत्र 'दध्याज्यपान्' इत्याद्यस्तावत् प्राप्नोति। कुतः ? "अथ पृषदाज्यं गृह्णाति। [6]द्वयं वा इदं [7]सर्पिश्चैव दधि च " ( शत्रा ३.८.४.७) इति [8]द्रव्यद्वयस्योक्तत्वात्। [9]आज्यस्योपस्तरणाभिघारणार्थत्वेन हविःशेषत्वाद्धविष्ट्वं नास्तीति दध्येव हविः। ततो 'दधिपानू' इति द्वितीयः पक्षः। दध्याज्यमेलनेन [10]"पृषदाज्यनामकं द्रव्यान्तरम् उत्पद्यते" [11]तेन च अनूयाजा इज्यन्ते, ततः पृषदाज्यपानिति तृतीयः पक्षः। पृषत्वं नाम चित्रता, सा च आज्यगतो गुणः। स च दधिमेलनेन" निष्पद्यते। तस्मादाज्यस्यैव [12]द्रव्यत्वात् आज्यशब्दोपेता एव निगमाः पठितव्याः॥

**इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये**
**द्वितीयकाण्डे पञ्चमप्रपाठके नवमोनुवाकः विशेषाणि॥**

---

[1] आ .ष्अर्थःष नास्ति।
[2] त३ण्मैण लं. पूरयति।
[3] आ. अथ।
[4] कण शृंण हो १ .ष तत्रष नास्तिय अण इण उण जोण नाण पा . तत्रापि।
[5] ड.ष अपिष नास्ति।
[6] अण इण उण जोण नाण पाण हा . वाव।
[7] आ.ष्एवष नास्ति।
[8] डण हो १ . द्रष्टव्यं द्वयं।
[9] अण इण उण जोण पाण हा . भिघारणेनय डण शृंण हो १ . भिघारणत्वेन।
[10] आण क. निष्पद्यते पृषदाज्यं द्रव्यान्तरम्।
[11] आण्क .. तदेव हविरिति पृषदाज्यपानिति तृतीयः पक्षः। दधिमेलनादाज्ये पृषत्ता गुणो।
[12] आण क . हविष्टवमिति।